संदास्यमानः, दापयिष्यमाणः, संदित्सिष्यमाणः, देदीयिष्यमाणः ;

धनदाः-धनदौ-धनदाः ; — —

दत्तम्-दत्तः-दत्तवान्, मनसादत्ता, [A]व्यात्तम्, प्रत्तम्-नीत्तम्-सूत्तम्-मरुत्तः, अवदत्तम्-प्रदत्तम्-विदत्तम्-सुदत्तम्-निदत्तम्, अनुदत्तम्-अवत्तम्-अनूत्तम्,

दापितः, दित्सितः, देदीयितः-तवान् ;

प्रदः, दायः, [B]इष्टदः-नर्मदा, अब्दः, [गवां गोषु वा] [C]दायादः, [D]विश्वासप्रदः, उपदाः, सुदामा-सुदीवा-गोदावरी, शर्मदाः, [E]शापदायी, साधुदायी, कर्णदायी, मोक्षदायी, ददिवान्, दाता, दारुः, दायको [व्रजति], [F]भयदायः, कम्बलदायः, गोदायो [वा व्रजति], दानीयः [ब्राह्मणः], दाता, अवश्यंदायी, सहस्रंदायी, प्रदायी, यज्ञदत्तः, आदिः, अन्तर्दिः, दापः,

दित्सुः, देयः ;

दातव्यम्, दापयितव्यम्, दित्सितव्यम्, देदीयितव्यम् ;

दानीयम्, [1]दथेलिमम्, दापनीयम्, दित्सनीयम्, देदीयनीयम् ;

देयम्, दाप्यम्, दित्स्यम्, देदीय्यम् ;

ईषद्दानः-दुर्दानः-सुदानः ; — — —

दीयमानः, दाप्यमानः, दित्स्यमानः, देदीय्यमानः ;

दायः, दापः, दित्सः, देदीयः ;

दातुम्, दापयितुम्, दित्सितुम्, देदीयितुम् ;

---

1. 'केलिमर उपसंख्यानम्' (वा. 3-1-96) इति केलिमर्प्रत्ययः। केलिमर्प्रत्ययस्य कित्वात् घुसंज्ञकस्यास्य धातोः 'दो दद्घोः' (7-4-46) इति 'दथ्' इत्यादेशः। तत्र च 'तान्ते दोषो दीर्घत्वं स्यात्, दान्ते दोषो निष्ठानत्वम्। धान्ते दोषो धत्वप्राप्तिः, निर्दोषत्वात् थान्तो ग्राह्यः॥' (भाष्यम् 7-4-46) इत्युक्तत्वात् थकारान्त आदेश इति ज्ञेयम्।

A. 'ध्वान्तेऽपि व्यात्तवक्त्रज्वलदनलशिखाजर्जरैर्व्यक्तकर्मा
निर्मन्ती गृध्ररौद्रीं दिवमुपरि परिक्रीडते ताटकेयम्॥' अनर्घराघवे-2-54.

B. 'तिष्ठन्निहाम्नायगमिष्टदं तमस्तौत् स्फुटेनाहतधीः स्वरेण॥' धा. का. 2-33.

C. 'स्थितः प्रास्तस्य दायादैः भ्रातुर्ज्येष्ठस्य शासने॥' किरातार्जुनीये 11-45.

D. 'विश्वासप्रदवेषोऽसौ पथिप्रज्ञः समाहितः।' भ. का. 6-90.

E. 'कैलासशैलचलनागसि शापदायी नन्दीश्वरः स्वयमुपागत इत्यमंस्त॥'
चम्पूरामायणे-5-47.

F. 'पूरयन्तः समाजग्मुर्भयदाया दिशो दश॥' भ. का. 7-30.